# Vedapurushaproktam Shivalingarchanopadesham

# वेदपुरुषप्रोक्तं शिवलिङ्गार्चनोपदेशम्

## Document Information

Text title : Vedapurushaproktam Shivalingarchanopadesham

File name : vedapuruShaproktaMshivalingArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 24| 420-444||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

Vedapurushaproktam Shivalingarchanopadesham

# वेदपुरुषप्रोक्तं शिवलिङ्गार्चनोपदेशम्

(शिवरहस्यान्तर्गते उग्राख्ये)
वेदपुरुषः
शिवलिङ्गस्वरूपस्य शिवस्य परमात्मनः ।
कर्तव्यमर्चनं भक्त्या भुक्तिमुक्तिप्रदायकम् ॥ ४२० ॥

ब्राह्मण्यमपि सम्प्रप्य यो नार्चयति शङ्करम् ।
स दुर्भग इति ज्ञेयो ब्राह्मणैर्वेदवित्तमैः ॥ ४२१ ॥

येन तप्तं तपः पूर्वमघघ्नं शङ्करालये ।
तस्यैव भवति श्रद्धा शिवलिङ्गसमर्चने ॥ ४२२ ॥

यः करिष्यति यत्नेन शिवलिङ्गे शिवार्चनम् ।
स साक्षाच्छङ्करं साम्बं समर्चयति सर्वथा ॥ ४२३ ॥

लिङ्गे समर्चितः शम्भुर्ददाति वरमीप्सितम् ।
अतः प्रयत्नतो नित्यं कर्तव्यं लिङ्गपूजनम् ॥ ४२४ ॥

उद्धूलनं त्रिपुण्ड्रं च तथा रुद्राक्षधारणम् ।
कर्तव्यमतियत्नेन लिङ्गपूजापरैर्द्विजैः ॥ ४२५ ॥

कर्तव्यो लिङ्गपूजान्ते पञ्चाक्षरजपो द्विजैः ।
सहस्रमप्रमादेन रुद्राध्यायजपस्ततः ॥ ४२६ ॥

रुद्राध्यायेन कर्तव्यं शिवलिङ्गाभिषेचनम् ॥ ४२७ ॥

बिल्वपत्रः पूजनीयं शिवलिङ्गं प्रयत्नतः ।
अयं मे हस्त इत्याद्यैः सव्यस्ततलेन यः ॥ ४२८ ॥

उपस्पृशेल्लिङ्गपार्श्वं स पापेभ्यो विमुच्यते ।
प्रदक्षिणाष्टकं कार्यमधिकं तु शिवालये ॥ ४२९ ॥

कृताञ्जलिपुटैरेव शिवस्मरणपूर्वकम् ।

यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥ ४३० ॥

तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ।
उत्थायोत्थाय साष्टाङ्गान्प्रणामान् विंशदुत्तमान् ॥ ४३१ ॥

यः करिष्यति यत्नेन स पापेभ्यो विमुच्यते ।
प्रणम्य परमेशाग्रे करताडनपूर्वकम् ॥ ४३२ ॥

यो नृत्यत्यन्वहं भक्त्या स पापेभ्यो विमुच्यते ।
वृषस्य वृषणं स्पृष्ट्वा वृषशृङ्गान्तरान्मुदा ॥ ४३३ ॥

यः पश्येल्लिङ्गमैशानं स पापेभ्यो विमुच्यते ।
भुवनत्रयतीर्थानि सर्वाण्यपि निशामुखे ॥ ४३४ ॥

वृषाण्डं समुपाश्रित्य तिष्ठन्ति मुनिसत्तमाः ।
वृषाण्डं यः स्पृशेत्सायं स तीर्थान्यखिलान्यपि ॥ ४३५ ॥

स्पृष्टः स्नातश्च सततं पूतश्चात्र न संशयः ।
द्रष्टव्यमैश्वरं लिङ्गं वृषशृङ्गान्तराद् द्विजाः ॥ ४३६ ॥

वृषेशवृषणं स्पृष्ट्वा शिवस्मरणपूर्वकम् ।
प्रदक्षिणनमस्कारान्कृत्वा दृष्ट्वा च शङ्करम् ॥ ४३७ ॥

पुनः प्रदक्षिणं कृत्वा शिवलोके महीयते ।
इमानि नित्यं कार्याणि भस्मधारणपूर्वकम् ॥ ४३८ ॥

शिवलिङ्गार्चनादीनि ब्राह्मणाद्यैः प्रयत्नतः ।
सततं शिवपूजायां चित्तं यस्यानुवर्तते ॥ ४३९ ॥

स धन्य इति विज्ञेयस्तेन मुक्तिरवाप्यते ।
शिवपूजापि कर्तव्या शिवलिङ्गे निरन्तरम् ॥ ४४० ॥

शिवलिङ्गे कृता पूजा सर्वकामप्रदायिका ।
ये पूजयन्ति सततं शिवलिङ्गं शिवात्मकम् ॥ ४४१ ॥

न तेषां गर्भवासादिदुःखानि द्विजपुङ्गवाः ।
शिवनामामृतं येन पीतं येन मुदा मुहुः ॥ ४४२ ॥

नैव पास्यत्यसौ मातुः पुनः स्तन्यमितः परम् ।
शिवनामामृते पीते जन्मैव न भविष्यति ॥ ४४३ ॥

एवं चेत्स्तन्यपानं तु दुर्लभं ह्यस्य सर्वथा ॥ ४४४॥

॥ इति शिवरहस्यान्तर्गते वेदपुरुषप्रोक्तं शिवलिङ्गार्चनोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २४। ४२०-४४४॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 24 . 420-444..

Proofread by Ruma Dewan

*Vedapurushaproktam Shivalingarchanopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*